## अतिशायने तमबिष्ठनौ । (५५/२००१)

अतिशयनमतिशायनं प्रकर्षः । निपातनाद् दीर्घत्वम् । प्रकृत्यर्थविशेषणं चैतत् । अतिशायनविशिष्टेऽर्थे वर्तमानात् [1]प्रातिपदिकात् स्वार्थे [2]तमबिष्ठनौ प्रत्ययौ भवतः । प्रकृत्यर्थविशेषणं च स्वार्थिकानां द्योत्यं भवति । सर्व इमे आढ्याः, अयमेषामतिशयेन आढ्यः आढ्यतमः । दर्शनीयतमः । [3]सुकुमारतमः । [4]अयमेषामतिशयेन पटुः पटिष्ठः[5] । लघिष्ठः[6] । गरिष्ठः[7] । यदा [8]च प्रकर्षवतां[9] पुनः प्रकर्षो विवक्ष्यते तदातिशायिकान्ताद[10]परः प्रत्ययो भवत्येव । 'देवो वः सविता प्रार्पयतु श्रेष्ठतमाय कर्मणे' (वा.सं. १.१) । युधिष्ठिरः श्रेष्ठतमः कुरूणाम् [11]इति ॥

## तिङश्च । (५६/२००२)

तिङन्तात् च अतिशायने[12] द्योत्ये तमप् प्रत्ययो भवति । 'ङ्याप्प्रातिपदिकात्' (४.१.१/२८२) इत्यधिकारात् तिङो न प्राप्नोति इति इदं वचनम्[13] । सर्वे इमे पचन्ति इति, अयमेषाम् अतिशयेन पचति पचतितमाम् । [14]जल्पतितमाम् । इष्ठन्नोदाह्रियते, [15]गुणवचने तस्य [16]नियतत्वात् ॥

## द्विवचनविभज्योपपदे तरबीयसुनौ । (५७/२००५)

द्वयोरर्थयोर्वचनं द्विवचनम् । विभक्तव्यो विभज्यः । निपातनाद् यत् [17]भवति । द्व्यर्थे विभज्ये चोपपदे [18]प्रातिपदिकात् [19]तिङन्ताच्च अतिशायने तरबीयसुनौ प्रत्ययौ भवतः । तमबिष्ठनोरपवादौ । यथासङ्ख्यमत्र नेष्यते[20] । द्वाविमावाढ्यौ, अयमनयोरतिशयेन [21]आढ्यः आढ्यतरः । सुकुमारतरः[22] । [23]पचतितराम् । जल्पतितराम् । ईयसुन् खल्वपि – द्वाविमौ पटू, अयमनयोरतिशयेन पटुः पटीयान् । लघीयान् । विभज्ये चोपपदे[24] – माथुराः पाटलिपुत्रकेभ्य आढ्यतराः । [25]दर्शनीयतराः । पटीयांसः । लघीयांसः ॥

## अजादी गुणवचनादेव । (५८/२००६)

इष्ठन्नीयसुनौ अजादी सामान्येन [26]विहितौ, तयोरयं विषयनियमः क्रियते, [27]गुणवचनादेव भवतस्तौ नान्यस्माद् इति । पटीयान् । लघीयान् । [28]पटिष्ठः । लघिष्ठः । इह न भवतः, पाचकतरः, पाचकतमः [29]इति । [30]एवकारः इष्टतोऽवधारणार्थः, प्रत्ययनियमोऽयं न प्रकृतिनियमः [31]इति । [32]पटुतरः । [33]पटुतमः[34] ॥

---

1. प्रातिपदिकात् नास्ति फ. 2. तमप् इष्ठन् इत्येतौ फ. ह. 3. सुकुमारतमः नास्ति ब. 4. सर्वे इमे पटवः इत्यधिकम् ब. क. ड. फ. ह. 5. पटुतमः इत्यधिकम् फ. 6. लघुतमः इत्यधिकम् फ. 7. गुरुतमः इत्यधिकम् फ. 8. च नास्ति फ. 9. पुंसां इत्यधिकम् फ. 10. प्रातिपदिकात् इत्यधिकम् क. फ. 11. इति नास्ति फ. 12. अर्थे इत्यधिकम् क, स्वार्थे ब, द्योत्ये नास्ति ग. 13. आरभ्यते इत्यधिकम् क. फ 14. पठतितराम् फ. 15. गुणवचनादेव क. ड. फ. 16. नियमात् क, इति विधानत्वात् ब. 17. प्रत्ययः इत्यधिकम् फ. 18. ङ्याप् इत्यधिकम् ब. ड. ह. 19. तिङश्च फ. 20. अस्वरितत्वात् इत्यधिकम् क. 21. आढ्यः नास्ति ब. फ. ह, अतिशयेन नास्ति ह. 22. दर्शनीयतरः इत्यधिकम् ब. ड. फ. 23. पठतितराम् फ. 24. खल्वपि इत्यधिकम् ड. फ. ह. 25. सुकुमारतराः ड, पञ्चालाः गौडेभ्यः पटुतराः इत्यधिकम् फ. 26. विहितयोः क. 27. अजादी प्रत्ययौ इत्यधिकम् क. 28. पटिष्ठः नास्ति क. 29. इति नास्ति फ. 30. एवकारकरणं फ. 31. इति नास्ति क. 32. तेन इत्यधिकम् क. 33. इति भवति इत्यधिकम् क.